# स्वर्णाकर्षण नवावरण रागमालिका

(हरिकेशनल्लूर् मुत्तय्या भागवतर्)

## रागमलिका ताळम् आदि

## गणेश स्तुति - रागं धन्याशि

स्वर्णाकर्षणगणपते सुगुणधनासिम

दयानिधे करुणामृतायित नवावरण
शुभ गानकृतौ शक्तिं देहि सुमते

## प्रथम आवरणं - रागं मोहनम्

त्रैलोक्यमोहनचक्राधीश्वरि

त्रिपुरादिकोणगाते विभास्वरि

आलोकमात्रेण अणिमादि दायिनि
अम्बा कुमरि मामवतु भवानि

## द्वितीय आवरणं - रागं वसन्त

सर्वाशापुरकचक्र निवासिनीं

साधुभववसन्तापविनाशिनीम्

निर्वाणसौख्यदां निर्मलां त्रिमूर्तिं
नीरजासिनीं भजे निरन्जनकीर्तिम्

## तृतीय आवरणं - रागम् भैरवि

अनङ्गकुसुमादि अष्टशक्तियुतया

अखिलसंक्षोभणचक्रनिरतया

अनङ्गाद्युपासिते कल्याणि हित्वया

अनिशं रक्ष्य ते जगत् भैरविनुतया

## चतुर्थ आवरणं - रागं काम्भोजि

सुकुमाररोहिणीपदायै नमोखिल

सोभाग्यदायकाम्भोदीन्दवे नमो

बहुमनुकोणनिलयायै नमो नमो
भासुरहीरवलयायै नमो

## पञ्चम आवरणं - रागं तोडि

काळीतोडियते नमे मनस्सुखि

कामितसर्वार्थसाधकि नायकि

ललितनादस्वरूपधराय
लास्यनवाधार विश्वम्बराय

## षष्ट आवरणं - रागं कल्याणि

दशकलात्मकवह्नितशारदे

सकलरक्षाकरचक्रविराजिते

दशबले कल्याणि चण्डिकादेवि
ते दासोहं दशमुद्रासेविते

## सप्तम आवरणं - रागं अठाणा

शाम्भवि त्वयी भक्तिं सततं मे

देहि सर्वरोगहरचक्रेशं एहि

जांबुनतनिभे सकलवशङ्करि
समय व्रताटनमोहम् शङ्करि

## अष्टम आवरणं - रागं सुरटि

निरुपममहिमे दुर्गे निरञ्जनि

निखिलसिद्धिप्रदचक्रसुरञ्जनि

सुरटीकितगुणे शोकनिवारिणि
शुभमयि गुरु शिवदेहविहारिणि

## नवम आवरणं - रागं सौराष्ट्रं

सकलानन्दमयचक्रनिवासे

सच्चिदानन्दबिम्बविकासे

अखिलागमनुते अम्बा सुभद्रे
मोदय सौराष्ट्रं मोदसमुद्रे

## मङ्गळम् - रागं श्री

नवावरणश्रीराग मालां

नवां समर्पितां स्वीकुरु तव लीलाम्

शिवे श्रीचामराजमहीशे दिश
मङ्गळं सदा श्रित हरिकेशे

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠